श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ एकोनषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनषष्टितमः सर्गः ॥

## सम्पातिना स्वपुत्रस्य सुपार्श्वस्य मुखतः श्रुतायाः सीतारावणदर्शनसम्बन्धिघटनाया वर्णनम्

ततस्तदमृतास्वादं गृध्रराजेन भाषितम्।
निशम्य वदता हृष्टास्ते वचः प्लवगर्षभाः॥ **4.59.1** ॥

जाम्बवान् वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः।
भूतलात् सहसोत्थाय गृध्रराजानमब्रवीत्॥ **4.59.2** ॥

क्व सीता केन वा दृष्टा को वा हरति मैथिलीम्।
तदाख्यातु भवान् सर्वं गतिर्भव वनौकसाम्॥ **4.59.3** ॥

को दाशरथिबाणानां वज्रवेगनिपातिनाम्।
स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम्॥ **4.59.4** ॥

स हरीन् प्रतिसम्मुक्तान् सीताश्रुतिसमाहितान्।
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्॥ **4.59.5** ॥

श्रूयतामिह वैदेह्या यथा मे हरणं श्रुतम्।
येन चापि ममाख्यातं यत्र चायतलोचना॥ **4.59.6** ॥

अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः॥ **4.59.7** ॥

तं मामेवङ्गतं पुत्रः सुपार्श्वो नाम नामतः।
आहारेण यथाकालं बिभर्ति पततां वरः॥ **4.59.8** ॥

तीक्ष्णकामास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः।
मृगाणां तु भयं तीक्ष्णं ततस्तीक्ष्णक्षुधा वयम्॥ **4.59.9** ॥

स कदाचित् क्षुधार्तस्य ममाहाराभिकाङ्क्षिणः।
गतसूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः॥ **4.59.10** ॥

स मयाऽऽहारसंरोधात् पीडितः प्रीतिवर्धनः।
अनुमान्य यथातत्त्वमिदं वचनमब्रवीत्॥ **4.59.11** ॥

अहं तात यथाकालमामिषार्थी खमाप्लुतः।
महेन्द्रस्य गिरेर्द्वारमावृत्य सुसमाश्रितः॥ **4.59.12** ॥

तत्र सत्त्वसहस्राणां सागरान्तरचारिणाम्।
पन्थानमेकोऽध्यवसं सन्निरोद्धमवाङ्मुखः॥ **4.59.13** ॥

तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम्।
स्त्रियमादाय गच्छन् वै भिन्नाञ्जनचयोपमः॥ **4.59.14** ॥

सोऽहमभ्यवहारार्थं तौ दृष्ट्वा कृतनिश्चयः।
तेन साम्ना विनीतेन पन्थानमनुयाचितः॥ **4.59.15** ॥

नहि सामोपपन्नानां प्रहर्ता विद्यते भुवि।
नीचेष्वपि जनः कश्चित् किमङ्ग बत मद्विधः॥ **4.59.16** ॥

स यातस्तेजसा व्योम सङ्क्षिपन्निव वेगितः।
अथाहं खेचरैर्भूतैरभिगम्य सभाजितः॥ **4.59.17** ॥

दिष्ट्या जीवति सीतेति ह्यब्रुवन् मां महर्षयः।
कथञ्चित् सकलत्रोऽसौ गतस्ते स्वस्त्यसंशयम्॥ **4.59.18**॥

एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः।
स च मे रावणो राजा रक्षसां प्रतिवेदितः॥ **4.59.19**॥

पश्यन् दाशरथेर्भार्यां रामस्य जनकात्मजाम्।
भ्रष्टाभरणकौशेयां शोकवेगपराजिताम्॥ **4.59.20**॥

रामलक्ष्मणयोर्नाम क्रोशन्तीं मुक्तमूर्धजाम्।
एष कालात्ययस्तात इति वाक्यविदां वरः॥ **4.59.21**॥

एतदर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत्।
तच्छ्रुत्वापि हि मे बुद्धिर्नासीत् काचित् पराक्रमे॥ **4.59.22**॥

अपक्षो हि कथं पक्षी कर्म किञ्चित् समारभेत्।
यत् तु शक्यं मया कर्तुं वाग्बुद्धिगुणवर्तिना॥ **4.59.23**॥

श्रूयतां तत्र वक्ष्यामि भवतां पौरुषाश्रयम्।
वाङ्मतिभ्यां हि सर्वेषां करिष्यामि प्रियं हि वः॥ **4.59.24**॥

यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः।
तद् भवन्तो मतिश्रेष्ठा बलवन्तो मनस्विनः॥ **4.59.25**॥

प्रहिताः कपिराजेन देवैरपि दुरासदाः।
रामलक्ष्मणबाणाश्च विहिताः कङ्कपत्रिणः॥ **4.59.26**॥

त्रयाणामपि लोकानां पर्याप्तास्त्राणनिग्रहे।
कामं खलु दशग्रीवस्तेजोबलसमन्वितः।
भवतां तु समर्थानां न किञ्चिदपि दुष्करम्॥ **4.59.27**॥

**तदलं कालसङ्गेन क्रियतां बुद्धिनिश्चयः।**
**नहि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः॥ 4.59.28 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः॥